वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

# श्रीमद्भगवद्गीतायां कर्तव्याकर्तव्यस्य परिशीलनम्

**डॉ. गीताञ्जली नायक[१]**

## प्रस्तावना

विश्वस्मिन्नस्मिन् मानववादस्य परमोद्घोषकः प्रेममय-लीलापुरुषोत्तमस्य भगवतः श्रीकृष्णस्य मुखारविन्दात् श्रीमद्भगवद्गीतायारुत्पत्तिः। आर्यचेतना, दर्शनं, ज्ञानं तथा विज्ञानम् एतेषां परिपूर्णरूपं गीतायां परिलक्ष्यते। तेनैव गीता सर्वशास्त्रशिरोमणिः इति नाम्ना प्रथते। महाभारतस्य विश्वविख्याततटीकाकारः नीलकण्ठसूरिणोक्तं यत् –

**भारते सर्व वेदार्थो भारतार्थश्च कृत्स्नशः।**
**गीतायामस्ति तेनेयं सर्वशास्त्रमयी गीता॥**

अर्थात् महाभारते सर्वेषां वेदानां सारार्थः संगृहीतः। तथा समस्तस्य महाभारतस्य सारतत्त्वं गीतायां विद्यते। तेनैव गीता सर्वशास्त्रमयीति निगद्यते। न केवलमेतत् प्रस्थानत्रये गीतापि अन्तर्भवत्येव। आदिभगवत्पादः शङ्कराचार्यः अस्याः गीतायाः उपरि भाष्यमपि व्यलिखत्। तस्याः भगवतः श्रीकृष्णस्य मुखनिसृतायाः गीतायाः माहात्म्यविषयेऽपि उच्यते यत् –

**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।**
**या स्वयं पद्मनाभस्य मुखपद्मात् विनिसृता॥**

कलियुगेऽस्मिन् प्रायः सर्वे मानवाः पथभ्रष्टाः नष्टचरित्रयुक्ताश्च अभूवन्। तेन वक्तुं शक्यते यत् यदि सर्वे गीतागङ्गोदकं पीत्वा तत्र निरूपितानाम् अमृतानाम् आस्वादनपूर्वकं गीतोपदेशस्य परिपालनं विधास्यन्ति तर्हि समुचितनागरिकस्य निर्माणं तेन च समुचितराष्ट्रस्य निर्माणं सम्भवति। तेनैव शोधपत्रेऽस्मिन् कश्चन लघुप्रयासः विधीयते। प्रसङ्गेऽस्मिन् उक्तं यथा –

**गीता गङ्गोदकं पीत्वा पुनर्जन्म न विद्यते॥**

---

[१] Assistant Professor, Dept.of Second Language, Villa Marie Degree College for Woman, Hyderabad (Telengana State) 500082

## शोधपत्रस्यास्य उद्देश्यम्

वैदिककालात् प्रभृतिः अद्यावधिं यावत् यानि यानि काव्यानि रामायणमहाभारतादीनि विरचितानि सन्ति तत्र सर्वत्र बहवः उपदेशाः तथा मानवस्य कृते कर्तव्याकर्तव्यानि निर्दिष्टानि सन्ति। तेन च प्रवृत्तिनिवृत्त्युपदेशा अपि समुपलभ्यन्ते। यथा रामायणे – **रामादिवत् प्रवर्तितव्यं न रामणादिवदिति॥**अनेन रामस्य मार्गः अनुसर्तव्यः , न तु रावणस्य इति सदुपदेशः रामायणात् लभ्यते। तथैव यदि महाभारतस्य परिशीलनं कुर्मस्तर्हि यत्र यत्र धर्मः तत्र तत्र विदयप्राप्तिः अवश्यमेव भविष्यतीति सदुपदेशः प्राप्यते। येन मानवाः सर्वेऽपि करणीयकार्येषु प्रवृत्ताः तथा अकरणीयेकार्येषु निवृत्ताः भवेयुः। एवञ्च अन्येषु पुराणादिष्वपि तथैव कर्तव्याकर्तव्योपदेशः सुलभोऽस्ति। तथाहि श्रीमद्भगवद्गीतायामपि कुत्र कथं केन च प्रकारेण कर्म कर्तव्यमस्ति येन मानवजीवनं सुखतरं भवतीति निर्दिष्टमस्ति। तदेव शोधपत्रेऽस्मिन् परशीलनं कर्तुं कश्चन लघुप्रयासः विहितः। येन अस्यां गीतायामपि सर्वे मानवाः प्रवृत्ताः यत्नशीलाश्च भवेयुः।

## गीतायां कर्तव्याकर्तव्यानाम् उपदेशाः

भगवता श्रीकृष्णेन अर्जुनस्य कृते स्वजीवनस्य सफलतायै, मानवकल्याणाय तथा मानवानां कर्तव्याकर्तव्यविषये यत्र सदुपदेशः विहितः सः गीताग्रन्थः। श्रीमद्भगवद्गीतायां बहुषु श्लोकेषु मानवैः किं किं कर्तव्यं, किञ्च न कर्तव्यं तथा तेन को लाभः? का वा हानिरिति विषये निरूपितमस्ति। सदा धर्मकार्येषु मानवानां प्रवृत्तिः भवेत् न तु अधर्मकार्येषु इत्येव प्रमाणयितुम् भगवता निर्दिष्टं यत् –

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥**

**परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥ 1**

अत्र सुस्पष्टमेव प्रतीयते यत् मानवैः धर्मकार्येषु प्रवृत्ताः तथा अधर्मकार्येषु निवृत्ताः भवेयुः। अन्यथा प्रतियुगं भगवान् एकमवतारं स्वीकृत्य सज्जनानां संरक्षणं दुष्टानां च संहारं करिष्यति।

भगवान् श्रीकृष्णः काम-क्रोध-लोभ-मोहादिकं त्यक्तुमेव मानावानां कृते सदुपदिष्टम्। यदि मनुष्यः कामक्रोधादिषु लीनो भवति तर्हि तस्य मरणं सुनिश्चितमेव। तस्य कृते नरकस्य द्वारं भवति। कस्यापि

अनित्यस्य पदार्थस्योपरि अस्माकम् आकर्षणमपि नैव भवेत्। प्रसङ्गेऽस्मिन् उक्तमेव श्रीमद्भगवद्गीतायां द्वितीयाध्याये –

**ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।**
**सङ्गात्सञ्जायते कामः कामात् क्रोधोऽभिजायते॥**

**क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रभवति॥2**

अनेन श्रीकृष्णस्य वचनेन साक्षात् वक्तुं शक्यते यत् मानवाः कामक्रोधादिषु तथा संसारविषयेषु आसक्ताः नैव भवेयुः।

श्रीमद्भगवद्गीतायां द्वितीयाध्याये श्रीकृष्णेन इतोप्युक्तं यत् यः मनुष्यः सम्पूर्णरूपेण कामनां विहाय निःस्पृहरूपेण निरहङ्कारेण च आचरणं विदधाति सः सततं शान्तिमेव प्राप्स्यति। अतः मनुष्याः सदा अहङ्कारेण रहिताः कार्यं कुर्युः। येन तेषां कल्याणं भवेत्। प्रसङ्गेऽस्मिन् उक्तं यथा –

**विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः।**
**निर्ममो निरहङ्कारः स शान्तिमधिगच्छति॥ 3**

भगवान् श्रीकृष्णः मानवानां कृते समीचीनमेकं सदुपदेशं विदधाति यत् संसारेऽस्मिन् कुत्रापि कस्यापि जन्ममृत्युविषये चिन्ता दुःखं तथा आनन्दं नैव कर्तव्यम्। अर्थात् कस्यापि जन्मसमये (पुत्रप्राप्तौ) आनन्दं तथा मरणे दुःखं नैव कर्तव्यम्। यतो हि अत्र संसारे सर्वमपि चिरस्थायी नैवास्ति। सर्वे केवलं स्वकर्तव्यसम्पादनेन जीवनं यापयन्ति चेत् वरमेव। प्रसङ्गेऽस्मिन् उक्तं यथा–

**जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।**
**तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥ 4**

प्रकृतितः समुत्पन्नाः सत्त्वरसतमगुणाः विनाशशीलाः नैव भवन्ति तथा जीवात्मानं बन्धनं कुर्वन्ति। यदि मानवः सत्त्वगुणयुक्तः सन् कार्यं करोति तर्हि विशुद्धो भवति। रजगुणेन कृते कर्मणि दुःखलाभो जायते। तथा तमोगुणेन क्रियमाणे कर्मणि अज्ञानमेव प्राप्यते। सत्त्वगुणादेव प्रकृतज्ञानं प्राप्यते। रजोगुणात् लोभस्य तथा तमोगुणात् अज्ञानस्य वृद्धिर्जायते। तेन मनुष्यैः अस्माभिः सर्वैरपि सत्त्वगुणेन युक्तस्सन् कार्यं करणीयम्। प्रसङ्गेऽस्मिन् उक्तं यथा श्रीमद्भगवद्गीतायां चतुर्दशाध्याये सप्तदशश्लोके –

**सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च।**
**प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥ 5**

सत्त्वरजस्तमोगुणेन युक्तः पुरुषः यदि कार्यं करोति तर्हि तस्य मार्गः कुत्र कुत्र भवतीति विषयोऽपि श्रीमद्भगवद्गीतायां चतुर्दशाध्याये सुनिर्दिष्टम्। सत्त्वगुणी स्वीयकार्येण उच्चतरं लोकं प्रति गच्छति, रजोगुणी अस्मिन् धरातले विचरति तथा तमोगुणी नरकं गच्छति। प्रसङ्गेऽस्मिन् उक्तं यथा –

**ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।**
**जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः॥6**

अनेन श्लोकेन ज्ञातुं शक्यते यत् कीदृशं कर्म मानवानां भवेत्। येन तेषां गतिरपि परिकल्प्यते। तदर्थमेव सत्त्वरजस्तमसः प्रकृतिं परिणतिं च विज्ञाय अस्माभिः उचितानुचितकर्म कर्तव्यम्।

श्रीमद्भगवद्गीतायां त्रयोदशाध्याये निरूपितं यत् यः मनुष्यः प्रत्येकेषु जीवेषु समानरूपेण दृष्टिं स्थापयति सः कदापि मनसा अधोगतिं नाव प्राप्नोति। तथा च परमगतिं प्राप्नोति। सः द्रष्टुं शक्नोति यत् शरीरेण यद्यपि कार्याणि क्रियन्ते तथापि तत्सर्वमपि कर्म आत्मा नाव करोतीति सः यथार्थरूपेण पश्यति। उक्तं यथा –

**प्रकृत्येव च कर्माणि क्रियमाणानि सर्वशः।**
**यः पश्यति तथात्मानमकर्तारं स पश्यति॥ 7**

यज्ञकर्मणः उपरि विशेषरूपेण ध्यानं ददता श्रीकृष्णेनोक्तं यत् सर्वव्यापि परं ब्रह्म सदा यज्ञे प्रतिष्ठितं भवति। तदर्थं समुचिताचरणेन अन्यस्य धर्मस्यापेक्षया स्वधर्मस्य परिपालनं सदा कर्तव्यमेव भवति। स्वधर्मेण मरणं श्रेयः परन्तु अन्यस्य धर्मस्य परिपालनं भयावह एव भवतीति श्रीकृष्णेनोक्तम्। तेन सदा स्वधर्मस्य परिपालनमेव समुचितं भवतीति वक्तुं शक्यते। उक्तं यथा –

**श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।**
**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥ 8**

कर्मफलस्योपरि भगवता श्रीकृष्णेनोक्तं यत् हे मानवाः ! भवतां सर्वेषामपि कर्मण्येवाधिकारः वर्तते, न तु कर्मफलं प्रति। कर्मफलं तु दैवायत्तमेव भवति। अर्थात् मानवः यथा कर्म करोति, तदनुगुणमेव फलं भुङ्क्ते। तेन भगवान्नेव कर्मफलस्य कारणीभूतोऽसि।

तथा कर्मणः अकरणे प्रवृत्तिः मा भवतु। अत्र कथनस्याभिप्रायः स्वीयकर्म सततं कुरु , फलं तु दैवायत्तं भवतीति। एतादृशं कर्तव्यविषयं वदन् श्रीकृष्णेनोक्तं –

**कर्णण्येवाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥9**

कामनारहितः श्रद्धावान् पुरुष एव ज्ञानं प्राप्नोति, तेनैव ज्ञानप्राप्तौ शीघ्रमेव भगवत्प्राप्तिरूपं परमशान्तिं प्राप्तुं शक्यते। तदर्थमेव नित्यानित्यचराचरज्ञानप्राप्तये सततं प्रयत्नं कर्तव्यमिति गीतायामुपदेशः वर्तते। प्रसङ्गेऽस्मिन् उक्तं यथा –

**श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥10**

गीतायां पञ्चमाधाये कीदृशं कर्म कर्तव्यं तथा कर्मयोगिनः कथं कर्मसु प्रवृत्ताः भवन्तीति विषयमपि सुनिर्दिष्टम्। तत्रोक्तं यत् कर्मयोगिनः ममत्वबुद्धिरहितेन केवलम् इन्द्रिय-मनो-बुद्धिशरीरेण च आसक्तिं विहाय अन्तःकरणस्य शुद्धये कर्म कुर्वन्ति। उक्तं यथा –

**कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।**
**योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये॥ 11**

मानवजीवने श्रद्धायारुपरि विशेषरूपेण गौरवं प्रदर्शयन् श्रीकृष्णोनोक्तं अस्माभिः यत् किमपि वा कर्तव्यं तत्ससर्वमपि श्रद्धयैव भवेत्। अश्रद्धया किमपि नैव कर्तव्यम्। तत्र गीतायां भगवतोक्तं यत् मम कृते यदि कश्चन श्रद्धया एकं पत्रं, पुष्पं, फलं, तोयं प्रयच्छति तर्हि मया तदवश्यं स्वीक्रियते। अतः श्रद्धापूर्वकं स्वीयं कर्म कृत्वा भगवतः चिन्तनमपि श्रद्धयैव कर्तव्यमिति उपदेशः गीतायाः प्रप्यते। प्रसङ्गेऽस्मिन् उक्तं यथा –

**पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।**
**तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ 12**

श्रीमद्भगवद्गीतायां मोहस्य विषये समुचितोपदेशः भगवता श्रीकृष्णेन कृतः। अर्थात् कुत्रापि मोहः नैव कर्तव्य इति। कारणं तु ये श्रेष्ठपुरुषास्सन्ति, ते कुत्रापि मोहं नैव प्रकटयन्ति। अयञ्च मोहः स्वर्गप्रदायकः कीर्तिप्रदायको वा कदापि नैव भवति। अत एव हे पार्थ मोहं सर्वथा त्यज इति। प्रसङ्गेऽस्मिन् उक्तं यथा –

**कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।**
**अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन॥ 13**

यदा अर्जुनः स्वभ्रातृभिः कौरवैस्सह युद्धं कर्तुं नेच्छति, तदा भगवान् श्रीकृष्णः तं बोधयति। यः वीरः भवति सः कदापि नपुंसकता (क्लैब्यता) नैव प्रदर्शयेत्। अतः हे अर्जुन ! त्वं क्लैब्यं मा स्म गमः। हृदयस्य दौर्बल्यं त्यक्त्वा युद्धाय प्रवर्तस्व। अत्र एवम् उपदेशः प्राप्यते यत् यः वीरपुरषः भवति, सः पश्चात् धावनं न कृत्वा धैर्यपूर्वकं युद्धं कर्तव्यमिति ज्ञायते। सन्दर्भेऽस्मिन् उक्तं यथा गीतायां द्वितीयाध्याये –

**क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।**
**क्षुद्रं हृदयदौर्वल्यं त्यक्त्वोत्तिष्ठ परन्तप॥ 14**

संसारेऽस्मिन् सदा सुखं दुःखं, जयपराजयं, लाभक्षतिश्च समानरूपेण चिन्तनीयम्। अर्थात् यदि सुखमायाति चेत् सुखस्यानुभवं कृत्वा दुःखसमये बहुधा दुःखं नैव कर्तव्यम्। सुखं दुःखं च समानरूपेण विचिन्त्य यः कार्यं सम्पादयति, सः अवश्यं विजयं प्राप्नोति। तेनैव सर्वत्र समदृष्टिः भवेदिति श्रीकृष्णेनोक्तम्। उक्तं यथा –

**सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।**
**ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥ 15**

मानवैः स्वजीवने किं कर्तव्यं किञ्च न कर्तव्यमिति नैके विषयाः श्रीमद्भगवद्गीतायां सुनिर्दिष्टाः वर्तन्ते। ये जनाः सततं भोगेषु लीनाः भवन्ति, ये कर्मफलस्य प्रशंसाकुर्वाणाः वेदवाक्ये प्रीतिं जनयन्ति, आत्मातिरिक्तं येषां बुद्धौ स्वर्गप्राप्तिरेव परमं प्राप्यमस्तीति चिन्तनं वर्तते, तथा स्वग्रमतिरिच्य न्यत् किमपि नास्तीति चिन्तनं येषां वर्तते, ते केवलं सुमधुरं किमपि उक्त्वा विविधकुकर्मसु लिप्ताः भवन्ति। तथा च ते विविधभोगैश्वर्ये सातिशयं आसक्ताः सन्तः परमेश्वरे निश्चयात्मिकां बुद्धिं प्रकटयन्ति। दुःखञ्च अनुभवन्ति। तथा नैव कर्तव्यमिति उपदेशः गीतायां द्वितीयाध्याये –

**यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।**
**वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥**

**कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्।**
**क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति॥16**

समाजे मनुष्यः दुःखं प्राप्नोति चेत् सततं विचलितं व्यस्तञ्च भवति, तथा सुखं प्राप्नोति चेत् सातिशयं सानन्दितं भवति। परन्तु एतत् न युक्तम्। अत एव यः दुःखमायाति चेदपि अनुद्विग्नो भवति, तथा सुखेषु निस्पृहः भवति सः स्थितप्रज्ञ इत्युच्यते। अतः दुःखसमये बहुधा दुःखं नैव प्रकटयेत् , तथा च सुखेषु बहुधा आनन्दं नैव अनुभवेत्। उक्तं हि –

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**
**वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥17**

उत्तमाचरणेन सह परिपालितेऽपि धर्मान्तरापेक्षया स्वधर्मः मङ्गलदायको भवति। अर्थात् गुणहीनोऽपि स्वधर्मः अवश्यमेव परिपालनीयः। गुणवान्नपि परो धर्मः अवश्यमेव त्यक्तव्यम्। स्वधर्मे निधनं श्रेयस्करः। परन्तु परधर्मः भयस्य कारणं भवतीति गीतायां भगवता श्रीकृष्णेन अवादि। उक्तं हि –

**श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।**
**अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥ 18**

## उपसंहारः

एवञ्च यदि सूक्ष्मातिसूक्ष्मं विचारयामस्तर्हि श्रीकृष्णप्रोक्तायां श्रीमद्भगवद्गीतायां नैकेषु श्लोकेषु मानवानां कर्तव्याकर्तव्यविषये सूचना लभ्यते। तत्र गीतायां यः उपदेशः अर्जुनस्य कृते विहितः स चोपदेशः न केवलं तस्य कृते अपि तु सम्पूर्णमानवजातेः कृते विहितः। तेनैव तत्सर्वमपि विज्ञाय अस्माभिः मनुष्यैः स्वीयकर्मसु प्रवृत्ताः भवेमश्चेत् भारतमेकं सर्वोन्नतराष्ट्ररूपेण परिकल्पयितुं शक्नुमः।

## पादटिप्पणीः

1. गीतायाम् 4.7-8
2. गीतायाम् 2.62-63
3. गीतायम् 2.71
4. गीतायाम् 2.27
5. गीतायाम् 14.17
6. गीतायाम् 14.18
7. गीतायाम् 13.29
8. गीतायाम् 3.35
9. गीतायाम् 2.47
10. गीतायाम् 4.39

11. गीतायम् 5.11
12. गीतायाम् 9.26
13. गीतायाम् 2.2
14. गीतायाम् 2.3
15. गीतायाम् 2.38
16. गीतायाम् 2.42-44
17. गीतायाम् 2.56
18. गीतायाम् 3.35

## सहायकग्रन्थसूची

1. श्रीमद्भगवद्गीता, (सम्पा.) राजकुमार उपाध्याय 'मणि' चौखम्भा संस्कृत संस्थान, वाराणासी 2011
2. श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुर 2013